Shivaproktam Kashisthita Muktimandapamahatmyam

# ஶிவப்ரோக்தம் காஶீஸ்தி²த முக்திமண்ட³பமாஹாத்ம்யம்

## Document Information

Text title : Shivaproktam Kashisthita Muktimandapamahatmyam

File name : shivaproktaMkAshIsthitamuktimaNDapamAhAtmyam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 7 | vAvRittashlokAH ||

Latest update : March 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2024

*sanskritdocuments.org*

# ஶிவப்ரோக்தம் காஶீஸ்தி2த முக்திமண்ட3பமாஹாத்ம்யம்

- ஶிவபார்வதீஸம்வாதே3 -

ஶ்ரீபார்வத்யுவாச -

விஶ்வேஶ்வராகி2லாராத்4ய ஸர்வஜ்ஞ கருணாநிதே4 ।
க்வ முக்திமண்ட3பஸ்தா2நம் தத்ப்ரமாணம் கியந்மதம் ॥ 1 ॥

முக்திமண்ட3பஸம்ஜ்ஞாபி கத2மஸ்யாப4வச்சு2பா4 ।
ஏதத்ஸர்வம் விஶேஷேண ஶ்ரேதுமிச்சா2மி ஶங்கர ॥ 2 ॥

ஶ்ரீஸதா3ஶிவ உவாச -

அதி கஷ்டமித3ம் ப்ரு'ஷ்டமிதா3நீம் வரவர்ணிநி ।
முக்திமண்ட3பமாஹாத்ம்யம் ஶ்ரு'ணு வக்ஷ்யே மநோஹரம் ॥ 3 ॥

யத்ர ஜ்யோதிர்மயம் லிங்க3ம் மம விஶ்வேஶ்வராபி4த4ம் ।
தத்ராஸ்தி ரத்நப்ரஸாத:3ஸர்வலோகமநோஹர: ॥ 4 ॥

தத்ப்ரஸாத3ப்ரபா4ஸங்கை3ர்தி3ஶ: ப்ரதிதி3ஶாஸ்ததா2 ।
அத்யூர்த்4வலோகாஸ்ஸர்வேऽபி தீ3பிதா: ஸமலங்க்ரு'தா: ॥ 5 ॥

ப்ராஸாதோ3ऽபி ஸரத்நாட்4யோ லிங்கா3காரோ விராஜதே ।
தந்மூலமக்3ரபா4கோ3 வா ந கேநாபி ச த்3ரு'ஶ்யதே ॥ 6 ॥

அநர்த்4யரத்நமாலாபி:4 ஸர்வதா3லங்க்ரு'தா: ஶுபா:4 ।
முக்தாமாலாபரிவ்ரு'தோ மூலபா4கோ3ऽஸ்ய ஸர்வதா3 ॥ 7 ॥

ப்ராஸாத3தி3வ்யரத்நாநி ராத்ரௌ தீ3பா இவாம்பி3கே ।
திஷ்ட2ந்த்யத்யந்தரம்யாணி நேத்ரோத்ஸவகராணி ச ॥ 8 ॥

கதா3சித3ப்யந்த4காரஸம்ப3ந்த4ஸ்தத்த ஸர்வதா3(தா2) ।
நாஸ்த்யேவ ரத்நதீ3பௌக4ஸம்ப3ந்தே4ந வராநநே ॥ 9 ॥

ஸஹஸ்ரரத்நஶ்ரு'ங்கா3ணும் ராஜதே தத்ர ஸர்வதா3 ।
லிங்கா3காராணி ஶ்ரு'ங்கா3ணி ஶூத்3தா4ந்யப்ரதிமாநி ச ॥ 10 ॥

தேஜ: புஞ்ஜமிவாபா⁴தி ப்ராஸாத:³ ஸர்வதா³ ஶுபே⁴ ।
ரத்நபுஞ்ஜமய: ப்ரீதிம் ஸந்தநோதி நிரந்தரம் ॥ 11 ॥

ராஶீக்ரு’தமஹாரத்நப்ரபே⁴யமிதி தீ:⁴ஸதா³ ।
ஸர்வேஷாம் ப⁴வதிஸ்பஷ்டம் தத்ப்ராஸாதா³வலோகநாத் ॥ 12 ॥

விலாஸஸத³நம் ரம்யம் மம தாத்³ரு’ஶமம்பி³கே ।
நாந்யத்ர த்³ரு’ஶ்யதே ப⁴வ்யம் நித்யோத்ஸாஹகரம் பரம் ॥ 13 ॥

ஸஹஸ்ரகோடிக³ணைரத்யுக்³ரைருத்³யதாயுதை:⁴ ।
வீரை: ஸம்ரக்ஷ்யதே நித்யம் ப்ராஸாதோ³ விமலோ மம ॥ 14 ॥

ஶ்ராவ்யோ து³ந்து³பி⁴நிர்ஹ்ராதோ³ ஜாயதே தத்ர ஸர்வதா³ ।
கா³யந்தி கா³யகா நித்யம் ஶிவநாமாநி ஸாத³ரம் ॥ 15 ॥

ந்ரு’த்யந்தி நர்தகாஶ்சாத்ர சித்ரந்ரு’த்யவிஶாரதா:³ ।
மந்தா³ரபுஷ்பஸஞ்ச²ந்நோ ரத்நதோரணஸம்வ்ரு’த: ॥ 16 ॥

நித்யாநந்த³கரோ ப⁴வ்ய: ஸர்வமங்க³ளஸம்ஶ்ரய: ।
தை³வைராராதி⁴தோ நித்யம் த்⁴யாதச ஸகலை: ஸுரை: ॥ 17 ॥

தத்ப்ராஸாத³ஸமாலோகே ப்ராஸாதோ³ நைவ த்³ரு’ஶ்யதே ।
ஸர்வேஷாம் முக்திதோ³ நித்யம் த³ர்ஶநாதே³வ ஸர்வதா² ॥ 18 ॥

தத்ர லிங்க³ம் மமாஸ்த்யேகம் ரம்யம் விஶ்வேஶ்வராபி⁴த⁴ம் ।
தத்ப்ரபா⁴வோ ந தே³வைஶ்ச ஶக்யதே ஜ்ஞாதுமம்பி³கே ॥ 19 ॥

தல்லிங்க³தத்த்வமமலைர்வேதை³ரபி ந நிஶ்சிதம் ।
தத்ஸ்வரூபம் கத²ம் ஜ்ஞேயம் தத³ந்யைரல்பபு³த்³தி⁴பி:⁴ ॥ 20 ॥

வேதை³ரபி யதா²ஶக்தி ததே³வ ப்ரதிபாத்³யதே ।
ததே³வோபாஸ்யமகி²லைஸ்ததே³வாபீ⁴ஷ்டதா³யகம் ॥ 21 ॥

தத³நிர்தே³ஶ்யமமலமப்ரமேயமநாமயம் ।
நிஷ்கலங்க நிராகாரம் ததே³வ ஹி நிரஞ்ஜநம் ॥ 22 ॥

ததே³வ நித⁴நேத்யாதி³மந்த்ரவேத்³யம் யதா²த்மகம் ।
த³ர்ஶநாதே³வ ஸர்வேஷாம் மோக்ஷத³ம் தத்ஸநாதநம் ॥ 23 ॥

அநேககாலமத்யுக்³ரம் தப: குர்வந்தி ஸாத³ரம் ।
விஶ்வேஶ்வராபி⁴த⁴ம் லிங்க³ம் த்³ரஷ்டுமேவ மநீஷிபி:⁴ ॥ 24 ॥

அநேககல்பபர்யந்தமுபவிஶ்ய மயாபி வா ।
ப்ரபா4வஸ்தஸ்ய லிங்க3ஸ்ய வக்தவ்ய: கத2மம்பி3கே ॥ 25 ॥

கதா3சித3பி தல்லிங்க3ம் ந த்3ரு’ஷ்டம் யேந ஸர்வதா3 ।
ந தஸ்ய முக்திஸ்தத்ஸத்யம் ஸத்யம் ஸத்யம் ந ஸம்ஶய: ॥ 26 ॥

யத3ர்ஶநார்த2ம் முநய: குர்வந்தி ப3ஹுதா4 தப: ।
தத்3தி4 வைஶ்வேஶ்வரம் லிங்க3ம் த்3ரஷ்டவ்யம் ப3ஹுயத்நத: ॥ 27 ॥

யந்நபஶ்யந்தி முநயோ யந்ந பஶ்யந்தி தே3வதா: ।
யந்ந ஜாநந்தி வேதா3ஶ்ச தல்லிங்க3ம் ப்ரேக்ஷ்யமந்வஹம் ॥ 28 ॥

த்3வித்ராண்யதீவ ரம்யாணி பி3ல்வபத்ராணி ஸாத3ரம் ।
யேநார்பிதாநி தல்லிங்கே3 தேந முக்திரவாப்யதே ॥ 29 ॥

அபி4ஷிச்ய விதா4நேந யோ மாம் பி3ல்வத3ளைர்முதா3 ।
பூஜயிஷ்யதி புண்யாத்மா ஸ மோக்ஷமதி4க3ச்ச2தி ॥ 30 ॥

மத்3ப4க்தேந மயி ப்ரேம்ணா பத்ரம் வா ப2லமேவ வா ।
த3த்தம் ஸ்வோபஹ்ரு’தம் யத்து தத்3க்3ரஹிஷ்யாமி ஸாத3ரம் ॥ 31 ॥

ஏகம் பி3ல்வத3லம் ரம்யம் மத்3ப4க்தேநார்பிதம் மயி ।
அநந்தாக4ஹரம் நூநம் ஸத்யமேவோச்யதே மயா ॥ 32 ॥

மத்3ப4க்தோऽபி ஸ விஜ்ஞேய: ஸர்வபா4வேந ஸர்வதா3 ।
ஸர்வம் விஹாய மாமேவ ப4ஜதே ய: ஸதா3 முதா3 ॥ 33 ॥

விபூ4திருத்3ராக்ஷபரோ லிங்க3மேவார்சயந்முதா3 ।
மாமேவ ஶரணம் ப்ராப்தோ ய:ஸ ஏவ மம ப்ரிய: ॥ 34 ॥

மஹாபாஶுபதா: ஶுத்3தா4மஹாஶைவாஶ்ச ஸர்வதா3 ।
மாமர்சயந்தி மாமேவ ஶரணம் ப்ராப்நுவந்தி ச ॥ 35 ॥

மத்3ப4க்தவர்யை: ஸததம் மத3ர்சநபராயணை: ।
அவிமுக்தமித3ம் க்ஷேத்ரமாஶ்ரித்ய ஸ்தீ2யதே முதா3 ॥ 36 ॥

ஶைவை: பாஶுபதை: ஶுத்3தை4ர்மல்லிங்க3ம் பூஜ்யதே ஸதா3 ।
தைரேவ க்ரு’தபூஜாபி க்3ரு’ஹ்யதே ஸாத3ரம் மயா ॥ 37 ॥

பத்ரம் ப2லம் வா புஷ்பம் வா ஜலம் வா ஸ்வார்ஜிதம் ஶுப4ம் ।

மத்3ப4க்தேநார்பிதம் மஹ்யமநந்தாயோபகல்பதே ॥ 38॥

பத்ரேண்ப்யர்சிதம் லிங்க3ம் மோக்ஷத3ம் ஸர்வதே3ஹிநாம் ।
விஶ்வேஶ்வராபி4த4ம் தத்து தத்ப்ராஸாதே3ऽதி4திஷ்ட2தி ॥ 39॥

தத்ப்ராஸாத3வரஸ்யைவ த3க்ஷிணதி3ஶி பா4ஸுரம் ।
ரம்யம் மணிமயம் ஸ்தா2நமேகம் திஷ்ட2தி பாபஹம் ॥ 40॥

தத்ஸஹஸ்ரமணிஸ்தம்பை4ருத்தமைருந்நதை: ஶுபை:4 ।
ரஞ்ஜிதம் ராஜிதை:ஶ்ரு’ங்கை3ர்ஹேமஶ்ரு’ங்க3ஶ்ச ராஜிதம் ॥ 41॥

க்வசித்ஸ்ப2டிகஶ்ரு’ங்கௌ3கை4ர்லிங்கா3காரைர்மநோஹரை: ।
ஸ்தா2நம் தத்3ராஜதே தே3வி நேத்ரோத்ஸவகரம் ஸதா3 ॥ 42॥

தப்தாலகாஶ்சதுஷ்ஷஷ்டிகோடி ப்ரத2ம நாயகா: ।
உதா3யுதா4 மஹாவீரா மம ப்ரியகரா: ஸதா3 ॥ 43॥

தஸ்மிந்நேவ மஹாஸ்தா2நே ஶைவாஸ்தப்தாலகாஜ்ஞயா ।
உபவிஶ்யாதிஸந்துஷ்டாஸ்திஷ்டந்தி ஶிவபூஜகா: ॥ 44॥

ஸாத3ரம் ப4ஸ்மதி3க்3தா4ங்கா3 ருத்3ராக்ஷாப4ரணப்ரியா: ।
ருத்3ரஸூக்தஜபாஸக்தாஸ்திஷ்ட2ந்தி விமலாஶயா: ॥ 45॥

ஶைவம் மஹாமுநிம்(மநும்) நித்யம் ஸர்வபாபௌக4ஶாமகம் ।
ஜபத: ஸததம் ஸந்தோ வஸந்த்யத்யந்தமாத3ராத் ॥ 46॥

ஶுத்3தா4ந்த: கரணைஸ்தத்ர ஜப்த:ஶைவைர்மஹாமநு: ।
ஶைவோ மோக்ஷப்ரதோ3 நூநம் ப4வத்யேவ ந ஸம்ஶய: ॥ 47॥

ஏகதா3ப்யத்ர ஶைவேந ஜப்ய: ஶைவோ மநுர்முதா3 ।
அநந்தகு3ணிதோ நூநம் பாபதா3வாக்3நிஶாமக: ॥ 48॥

ஶைவோ மநு:ஸ்வத: ஶுத்3த:4 பாபதூலாதி3 நாஶக: ।
ஸோऽப்யத்ர ஜப்த: ஶைவேந்த்3ரை ஸர்வாபீ4ஷ்டப்ரதோ3 த்4ருவம் ॥ 49॥

ஶைவ ஏவ மஹாமந்த்ரோ ஜப்ய: பஞ்சாக்ஷர: பர: ।
ஶைவைர்மோக்ஷார்தி2பி4ர்நித்யம் மந்த்ரவல்லிங்க3பூஜகை: ॥ 50॥

தந்மத்4யே கர்ணிகாரா ரத்நராஜிவிராஜிதா ।
அத்யுந்நதா வேதி3கைகா திஷ்ட2தி ப்ரியத3ர்ஶநா ॥ 51॥

தந்மத்4யே யேக(சைக) காஶ்மீரமணிராஜிதமாநஸம்(ஸநம்) ।
ஸ்தி2தம் தது3பரி ஸ்பஷ்டமுபவிஷ்டம் மயா புரா ॥ 52॥

ததா3நீமாக3தா காசிதி3ந்டு4பி3ம்ப3நிபா4நநா ।
விஶாலபத்3மபத்ராப4நயநா நயநப்ரியா ॥ 53॥

மந்தா3ரமாலாமமலாமம்லாநாம் மது4பாவ்ரு’தாம் ।
த்4ரு’த்வா பத்3மாப4ஹஸ்தேந கௌஷமாம்ப3ரவிராஜிதா ॥ 54॥

ஸா மாம் த்3ரு’ஷ்ட்வாநதக்3ரீவா ப்ரணம்ய முஹுராத3ராத் ।
பி3ல்வைர்மந்தா3ரபுஷ்பைஶ்ச சக்ரே பூஜாம் யதா2விதி4 ॥ 55॥

பூஜயித்வா தத: ஸா மாம் க்ரு’தாஞ்ஜலிபுடா ததா3 ।
இத3மேவ வச: ப்ராஹ ஸ்தோத்ரை: ஸ்துத்வாஹ்யநேகதா4 ॥ 56॥

மஹேஶதி3வ்யஸ்தா2நாநி ஸந்தி காஶ்யாமநேகதா4 ।
கிமத்ர ரோசதே நித்யம் வஸதிஸ்தவ ஶங்கர ॥ 57॥

விஶேஷ: கோऽத்ர தே3வேஶ ஸர்வஸ்தா2நவிலக்ஷண: ।
கிமஸ்தி தத்த்வமேதஸ்ய வத3 ஸர்வம் விஶேஷத: ॥ 58॥

ப்ரு’ஷ்டோऽஹமேவம் ஸுப4கே3 தயா தத3நு ஸாத3ரம் ।
உத்தரம் த3த்தவாநஸ்மி தமே(தே3)வ ஶ்ரு’ணு ஸாத3ரம் ॥ 59॥

காஶீயம் ஸர்வலோகேப்4யோ மம ப்ரியகராऽநகே4 ।
தத்ராப்யந்தர்க்3ரு’ஹந்நாம க்ஷேத்ரம் ருசிகரம் மம ॥ 60॥

தந்மத்4யக3மித3ம் ரம்யம் ஸ்தா2நம் ப்ரியதரம் மம ।
தத்து லிங்க3மயம் யஸ்மாத்தத்ரப்ரீதிர்மமாநகே4 ॥ 61॥

யாத2த்ர வஸதிர்நித்யம் ததா2 நாந்யத்ர ஶோப4நே ।
அநிஶம் ப்ரீதிரத்ரைவ மம திஷ்ட2த்யநாமயே ॥ 62॥

கிஞ்ச காஶ்யாம் ம்ரு’தாந் ஸர்வாந் ஶிவதே3ஹாந் ஶிவார்சகாந் ।
ஶிவைகஶரணாநத்ர ஸமாநீய தத: பரம் ॥ 63॥

ஏதத்ஸிஹ்மாஸநே ஸம்யகு3பவிஶ்ய யதா2 ஸுக2ம் ।
மமாங்கே விமலே ஶுத்3தே4 ஶைவம் ஸம்வேஶ்ய ஸாத3ரம் ॥ 64॥

ஶைவாயாத்யந்தஶுத்3தா4ய முக்த்யர்த2ம் தத3நந்தரம் ।
ஶைவ: பஞ்சாக்ஷரோ மந்த்ரோ மயாஹ்யத்ரோபதி3ஶ்யதே ॥ 65॥

முக்திமண்ட3பஸம்ஜ்ஞாஸ்ய ஸ்தா2நஸ்ய ஶ்ருதிஸம்மதா ।
யதோ மயா மநு:ஶைவோ மோக்ஷாயாத்ரைவ தீ3யதே ॥ 66॥

- -

இத3மேவ மஹத்ஸ்தா2நம் முக்திமண்டபஸம்ஜ்ஞகம் ।
யத்ரோபதி3ஶ்யதே மந்த்ர: ஶைவாநாம் முக்திகாங்க்ஷிணாம் ॥ 103॥

அநந்யஶரணாநாம் து மத்3ப4க்தாநாமகா4பஹம் ।
தத: ப்ரவிஶ்யத4ர்மாத்மா மஹாஶைவாஶ்ரயம் ஸதா3 ॥ 104॥

முக்திமண்டபமத்யந்தஸுக2ம் ப்ராப்ய த்3விஜோத்தம: ।
ததோ மமாந்திகம் ப்ராப்ய சகாராப்4யர்சநம் முதா3 ॥ 105॥

மமைவ லிங்கே3 விமலே முக்திதே3 வேத3ஸம்ஸ்துதே ।
தத: ப்ரணம்ய ப3ஹுதா4 ஸ்துத்வா ஸ்தோத்ரைரநேகதா4 ॥ 106॥

சகார ந்ருத்யம் ப3ஹுதா4 ஸாத3ரம் ப4க்திபூர்வகம் ।
உபவிஶ்ய ததோঽத்ரைவ ஜப்த்வா மந்த்ரம் ஶிவாத்மகம் ॥ 107॥

ததோঽந்தர்க்3ருஹயாத்ராதி3 க்ருத்வா ப4க்திபுர:ஸரம் ।
ஜ்ஞாநவாபீதடே ரம்யே நிராஹாரோ ஜிதேந்த்3ரிய: ॥ 108॥

சகாரோக்3ரம் தப:ஸம்யங்முக்தயர்த2ம் ஶைவபுங்க3வ: ।
ஶிவைகநிரதோ நித்யம் ஷட்ஸஹஸ்ரயுகா3வதி4 ॥ 109॥

மந்த்ராதி4ராஜமமலம் ஜப்த்வா பாபௌக4நாஶநம் ।
தத: ஶரீரம் விஜஹௌ ஜ்ஞாநவாபீதடே ஶுபே4 ॥ 110॥

லிங்க3பூஜாம் ப்ரகுர்வாணோ வத3ந் ஶிவ ஶிவேதி ச ।
ததோ மமாங்க ஸம்விஶ்ய மமைவாநுக்3ரஹாத்3 த்3விஜ: ॥ 111॥

மந்த்ராதி4ராஜமமலம் ஜபந் பாபௌக4நாஶநம் ।
ஶைவம் ப்ராப்யமஹாமந்த்ரம் மோக்ஷம் ஸம்ப்ராப்ய ஶோப4தே ॥ 112॥

இத்யுக்தா ஸா மநோரம்யா முக்திமண்டபதே3வதா ।
யயௌ ஸ்வ ஸத3நம் ரம்யமம்பி3கே வரவர்ணிநி ॥ 113॥

யே முக்திமண்டபமநக4மநந்யலம்யம் ஸம்ப்ராப்ய ஶைவமநுமப்யதிபுண்யலப்4யம் ।

ஸம்பூஜயந்தி ஶிவமேகமுபாஸ்யமீஶம் தே ஸர்வதா$^{2}$ முநிவரா: ஶிவமாப்நுவந்தி ॥ 114 ॥

॥ இதி ஶிவரஹஸ்யாந்தர்க$^{3}$தே ஶிவப்ரோக்தம் காஶீஸ்தி$^{2}$தம் முக்திமண்ட$^{3}$பமாஹாத்ம்யம் ஸம்பூர்ணம் ॥

- ॥ ஶ்ரீஶிவரஹஸ்யம் । உக்$^{3}$ராக்$^{2}$ய: ஸப்தமாம்ஶ: । அத்⁴யாய: 7 । வாவ்ரு'த்தஶ்லோகா: ॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 7 . vAvRRittashlokAH ..

Notes:

Śiva ஶிவ details to Parvatī பார்வதீ, about the eminence of the Muktīmaṇḍapa முக்திமண்ட$^{3}$ப near Jñānavāpī ஜ்ஞாநவாபீ at Viśveśvara Jyotirliṅga Sthāna விஶ்வேஶ்வர ஜ்யோதிர்லிங்க$^{3}$ ஸ்தா$^{2}$ந in Kaśī காஶீ.
Kaśī காஶீ harbors several ŚivaTīrthaKṣetra ஶிவதீர்த$^{2}$க்ஷேத்ர that are outlined in ŚivaRahasyam saptāṃśaḥ ஶிவரஹஸ்யம் ஸப்தாம்ஶ:.

Proofread by Ruma Dewan

*Shivaproktam Kashisthita Muktimandapamahatmyam*
pdf was typeset on March 8, 2024

Please send corrections to *sanskrit@cheerful.com*